Total No. of Questions - 7] [Total Pages : 4
**(2022)**

# 9362

## M.A. Examination

SANSKRIT

(निरुक्त तथा उपनिषद्)

Paper–VI

(Semester-II)

Time : Three Hours] [Max. Marks : Regular : 80, Private : 100

परीक्षार्थी अपने उत्तरों को दी गयी उत्तर-पुस्तिका (40 पृष्ठ) तक ही सीमित रखें। कोई अतिरिक्त पृष्ठ जारी नहीं किया जाएगा।

1. केषाञ्चन चतुर्णां प्रसंगोल्लेखपूर्वकं व्याख्या विधेया–

(क) 'न निर्बद्धा उपसर्गा अर्थान् निराहुः' इति शाकटायनः। नामाख्यातयोस्तु कर्मोपसंयोगद्योतका भवन्ति। 'उच्चावचाः पदार्था भवन्ति' इति गार्ग्यः। तद् य एषु पदार्थः प्राहुर् इमे तं नामाख्यातयोर् अर्थविकरणम्।।

(ख) अथाऽपि इदम् अन्तरेण–मन्त्रेष्वर्थप्रत्ययो न विद्यते। अर्थम् अप्रतियतो नात्यन्तं स्वर-संस्कारोद्देशः। तद् इदं विद्या-स्थानं व्याकरणस्य कात्स्न्र्यम्, स्वार्थ-साधकं च।।

(ग) तद्येषु पदेषु स्वरसंस्कारौ समर्थौ प्रादेशिकेन विकारेण गुणान्वितौ स्याताम् तथा तानि निर्ब्रूयात्।

(घ) नावैयाकरणाय, नानुपसन्नाय, अनिदविदे वा, नित्यं ह्यविज्ञातुर्विज्ञानेऽसूया। उपसन्नाय तु निर्ब्रूयात्, यो वाऽलं विज्ञातुं स्यात्, मेधाविने, तपस्विने वा।

(ङ) 'तिस्रः एव देवता' इति नैरुक्ताः–अग्निः पृथिवीस्थानः, वायुर्वा इन्द्रो वाऽन्तरिक्षस्थानः, सूर्यो द्युस्थानः।

(च) तद्येऽनादिष्टदेवताः मन्त्रास्तेषु देवतोपरीक्षा। यद्देवतः स यज्ञो वा यज्ञाङ्गं वा, तद्देवता भवन्ति। अथान्यत्र यज्ञात् 'प्राजापत्याः' इति याज्ञिकाः, 'नाराशसा' इति नैरुक्ताः।

(छ) यद गृहीतमविज्ञातं निगदनैव शब्द्यते।

अनग्नाविव शुष्कैन्धो न तज्ज्वलति कर्हिचित्।। 16(20)

2. 'तास्त्रिविधाः ऋचः–परोक्षकृताः, प्रत्यक्षकृताः, आध्यात्मिक्यश्च।'–इत्यस्य तात्पर्यं स्पष्टी कुरुत।

अथवा

'मन्त्राः सार्थकाः' इति नैरुक्ताः–इति यास्कस्य मतं प्रतिपादयत।

12(15)

3. केषाञ्चन षट्पदानां निर्वचनं लिखत– 12(15)

आचार्य, गो, अश्व, नदी, अन्तरिक्ष, गायत्री, रश्मि, निघण्टु, पुत्र, उषस्, अहर्, मेघ।

4. कयोश्चित् **द्वयोः** प्रसंगोल्लेखपूर्वकं व्याख्या विधेया–

(क) कुर्वन्नेह कर्माणि जिजीविषेच्छतं समाः।

एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे।।

(ख) हिरण्यमयेन पात्रेण सत्यस्यापिहितं मुखम्।

तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये।।

(ग) अन्यदेवाहुः सम्भवादन्यदाहुरसम्भवात्।

इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे।।

(घ) वायुरनिलममृतथेदं भस्मान्तं शरीरम्।

ॐ क्रतो स्मर कृतं स्मर क्रतो स्मर कृतमं स्मर।। 12(15)

5. ईशोपनिषदि 'सम्भूति-असम्भूति'–इति सम्बन्धे किं प्रतिपादितम्?

अथवा

'ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।....'–इत्यस्य अभिप्रायं लिखत। 8(10)

6. कयोश्चित **द्वयोः** प्रसंगोल्लेखपूर्वकं व्याख्या करणीया–

(क) स वा एषः पुरुषोऽन्नरसमयः। तस्येदमेव शिरः। अयं दक्षिणः पक्षः। अयमुत्तर पक्षः। अयमात्मा। इदं पुच्छं प्रतिष्ठा। तदप्येष श्लोको भवति।

(ख) वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति। सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः। आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः। सत्यान्न प्रमदितव्यम्।

(ग) ओमिति ब्रह्म। ओमितीदं सर्वम्। ओमित्येतदनुकृतिर्ह स्म वा अप्यो श्रावयेत्याश्रावयन्ति। ओमिति सामानि गायन्ति। ओं शोमिति। शास्त्राणि शं सन्ति।

(घ) विज्ञानं ब्रह्मेति व्यजानात्। विज्ञानद्ध्येव खल्विमानि भूतानि जायन्ते। विज्ञानेन जातानि जीवन्ति। विज्ञानं प्रयन्त्यभिसंविशन्तीति।

12(15)

7. तैत्तिरीयोपनिषदि वर्णितं अन्नस्य महत्त्वं प्रतिपादयत।

अथवा

तैत्तिरीयोपनिषदि ब्रह्मस्य किं स्वरूपं प्रतिपादितम्? 8(10)